# Shri Chamundeshvari Mangalam

# શ્રીચામુણ્ડેશ્વરીમઙ્ગલમ્

## Document Information

Text title : Chamundeshvari Mangalam

File name : chAmuNDeshvarImangalam.itx

Category : devii, mangala, durgA, devI

Location : doc_devii

Proofread by : NA, PSA Easwaran

Latest update : December 27, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2020

*sanskritdocuments.org*

# શ્રીચામુણ્ડેશ્વરીમઙ્ગલમ્

શ્રીશૈલરાજતનયે ચણ્ડમુણ્ડનિષૂદિનિ ।
મૃગેન્દ્રવાહને તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૧॥

પઞ્ચવિંશતિ સાલાઢ્ય શ્રીચક્રપુરનિવાસિનિ ।
બિન્દુપીઠસ્થિતે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૨॥

રાજરાજેશ્વરિ શ્રીમદ્કામેશ્વરકુટુમ્બિનિ ।
યુગનાથ તતે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૩॥

મહાકાલિ મહાલક્ષ્મિ મહાવાણિ મનોન્મણિ ।
યોગનિદ્રાત્મકે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૪॥

મન્ત્રિણિ દણ્ડિનિ મુખ્યયોગિનિ ગણસેવિતે ।
ભણ્ડદૈત્યહરે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૫॥

નિશુમ્ભમહિષાશુમ્ભેરક્તબીજાદિમર્દિનિ ।
મહામાયે શિવે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૬॥

કાલરાત્રિ મહાદુર્ગે નારાયણસહોદરિ ।
વિન્ધ્યાદ્રિવાસિનિ તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૭॥

ચન્દ્રલેખાલસત્પાલે શ્રીમત્સિંહાસનેશ્વરિ ।
કામેશ્વરિ નમસ્તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૮॥

પ્રપઞ્ચસૃષ્ટિરક્ષાદિ પઞ્ચકાર્યધુરન્ધરે ।
પઞ્ચપ્રેતાસને તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૯॥

મધુકૈટભસંહર્ત્રિ કદમ્બવનવાસિનિ ।
મહેન્દ્રવરદે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૧૦॥

નિગમાગમસંવેદ્યે શ્રીદેવિ લલિતામ્બિકે ।
ઓઢ્યાણપીઠગદે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૧૧॥

પુણ્ડ્રેક્ષુખણ્ડકોદણ્ડપુષ્પકણ્ઠલસત્કરે ।
સદાશિવકલે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૧૨॥

કામેશભક્તમાઙ્ગલ્ય શ્રીમત્ત્રિપુરસુન્દરિ ।
સૂર્યાગ્નીન્દુત્રિલોચનિ (નિત્યં) ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૧૩॥

ચિદગ્નિકુણ્ડસમ્ભૂતે મૂલપ્રકૃતિ(સ્વ)રૂપિણિ ।
કન્દર્પદીપકે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૧૪॥

મહાપદ્માટવીમધ્યે સદાનન્દવિહારિણિ ।
પાશાઙ્કુશધરે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૧૫॥

સર્વદોષપ્રશમનિ સર્વસૌભાગ્યદાયિનિ ।
સર્વસિદ્ધિપ્રદે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૧૬॥

સર્વમન્ત્રાત્મિકે પ્રાજ્ઞે સર્વયન્ત્રસ્વરૂપિણિ ।
સર્વતન્ત્રાત્મિકે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૧૭॥

સર્વપ્રાણિહૃદાવાસે સર્વશક્તિસ્વરૂપિણિ ।
સર્વાભિષ્ટપ્રદે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૧૮॥

વેદમાતઃ મહારાજ્ઞિ લક્ષ્મિ વાણિ વસુપ્રિયે ।
ત્રૈલોક્યવન્દિતે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૧૯॥

બ્રહ્મોપેન્દ્રસુરેન્દ્રાદિ સમ્પૂજિતપદામ્બુજે ।
સર્વાયુધકરે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૨૦॥

મહાવિદ્યાસમ્પ્રદાત્રિ સંવેદ્યનિજવૈભવે ।
સર્વમુદ્રાકરે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૨૧॥

એકપઞ્ચાશતે પીઠે નિવાસાત્મવિલાસિનિ ।
અપારમહિમે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૨૨॥

તેજોમયિ દયાપૂર્ણે સચ્ચિદાનન્દરૂપિણિ ।
સર્વવર્ણાત્મિકે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૨૩॥

હંસારૂઢે ચતુર્વક્ત્રે બ્રાહ્મીરૂપસમન્વિતે ।
ધૂમ્રાક્ષસહન્ત્રિકે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૨૪॥

માહેસ્વરીસ્વરૂપે પઞ્ચાસ્યે વૃષભવાહને ।
સુગ્રીવપઞ્ચિકે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૨૫॥

મયૂરવાહે ષડ્વક્ત્રે કૌમારીરૂપશોભિતે ।
શક્તિયુક્તકરે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૨૬॥

પક્ષિરાજસમારૂઢે શઙ્ખચક્રલસત્કરે ।
વૈષ્ણવીસંજ્ઞિકે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૨૭॥

વારાહિ મહિષારૂઢે ઘોરરૂપસમન્વિતે ।
દંષ્ટ્રાયુધધરે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૨૮॥

ગજેન્દ્રવાહનારુઢે ઇન્દ્રાણીરૂપવાસુરે ।
વજ્રાયુધકરે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૨૯॥

ચતુર્ભુજે સિંહવાહે જટામણ્ડિલમણ્ડિતે ।
ચણ્ડિકે સુભગે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૩૦॥

દંષ્ટ્રાકરાલવદને સિંહવક્ત્રે ચતુર્ભુજે ।
નારસિંહિ સદા તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૩૧॥

જ્વલજ્જિહ્વાકરાલાસ્યે ચણ્ડકોપસમન્વિતે ।
જ્વાલામાલિનિ તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૩૨॥

ભૃઙ્ગિણે દર્શિતાત્મીયપ્રભાવે પરમેશ્વરિ ।
નાનારૂપધરે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૩૩॥

ગણેશસ્કન્દજનનિ માતઙ્ગિ ભુવનેશ્વરિ ।
ભદ્રકાલિ સદા તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૩૪॥

અગસ્ત્યાય હયગ્રીવ પ્રકટીકૃતવૈભવે ।
અનન્તાખ્યસુતે તુભ્યં ચામુણ્ડાયૈ સુમઙ્ગલમ્ ॥ ૩૫॥

॥ ઇતિ શ્રીચામુણ્ડેશ્વરીમઙ્ગલં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*Shri Chamundeshvari Mangalam*

pdf was typeset on December 27, 2020

Please send corrections to *sanskrit@cheerful.com*